# Sharika Kavacham

# शारिकाकवचम्

## Document Information

Text title : Sharika Kavacham

File name : shArikAkavacham.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, Psa Easwaran psaeaswaran at gmail.com

Latest update : February 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2020

*sanskritdocuments.org*

# शारिकाकवचम्

ॐ श्रीगणेशाय नमः ।
अथ शारिकाकवचम् ।
श्रीभैरव उवाच -
ॐ अधुना शृणु देवेशि शारिकाकवचं परम् ।
त्रैलोक्यमोहनं नाम मूलमन्त्रमयं परम् ॥ १॥

अस्य श्रवणमात्रेण सर्वयज्ञफलं लभेत् ।
सर्वापत्तारणं दिव्यं सर्वसिद्धिप्रदं कलौ ॥ २॥

सर्वस्वं मे रहस्यं मे परमं परमाद्भुतम् ।
धारणादस्य देवेशि विष्णुना स जलोद्भवः ॥ ३॥

दानवेन्द्रो हतः शीघ्रमन्धकारो यथेन्दुना ।
मयापि त्रिपुराध्यक्षो दानवो जिष्णुना बलः ॥ ४॥

जम्भो वृत्रासुरो देवि प्रभावादस्य वर्मणः ।
कवचस्यास्य देवेशि ऋषिर्भैरव ईरितः ॥ ५॥

त्रिष्टुप्छन्दो देवता च त्रैलोक्यमोहिनीश्वरी ।
शारिका शर्म बीजं च माशक्तिः कीलकं गजः ॥ ६॥

त्रैलोक्यमोहविद्यार्थे विनियोगः प्रकीर्तितः ।
ॐ मे  दुर्गा शिरः पायादेकाक्षरविभूषणा ॥ ७॥

ॐ ह्रीं चण्डी ललाटं मे जगदुल्लासरूपिणी ।
ॐ ह्रीं श्रीं त्र्यक्षरा पातु भ्रुवौ मे भगमालिनी ॥ ८॥

ॐ ह्रीं श्रीं ह्रूं च नेत्रेऽव्यात्सर्वमङ्गलमङ्गला ।
ॐ ह्रीं श्रीं ह्रूं फ्रामऽव्यान्मे श्रुती शङ्करवल्लभा ॥ ९॥

ॐ ह्रीं श्रीं ह्रूं फ्रां आं पातु नासां नारायणेश्वरी ।

ॐ ह्रीं श्रीं ह्रूं फ्रां आं शां मे पातु वक्त्रं सरस्वती ॥ १०॥

अं आं इं ईं  रदान्पातु मातृका शेखरेश्वरी ।
उं ऊं ऋं ॠं ऌं ॡं एं ऐं पायादोष्ठौ भवप्रिया ॥ ११॥

ॐ औं अं अः गलं पातु नीलकण्ठासनेश्वरी ।
कं खं गं घं ङं मे पातु स्कन्धौ स्कन्दसमर्चिता ॥ १२॥

चं छं जं झं ञं मे पायाद्वक्षो वामप्रियाम्बिका ।
टं ठं डं ढं णं मे पायात्पार्श्वौ पर्वतनन्दिनी ॥ १३॥

तं थं दं धं नं मे पातु कुक्षिं कुलाकुलेश्वरी ।
पं फं बं भं मं मे पातु नाभिं नारदसेविता ॥ १४॥

यं रं लं वं गुदं पातु गुह्यकेश्वरपूजिता ।
शं षं सं हं कटिं पातु देवी कात्यायनी तथा ॥ १५॥

ळं क्षः ऊरू सदा पातु सर्वसारस्वतप्रदा ।
ॐ शां जानू शिवा पातु ॐ आं जङ्घेऽवतादुमा ॥ १६॥

ॐ फ्रां पादौ सदा पातु राजमातङ्गिनी मम ।
ॐ ह्रूं पादादिमूर्धान्तं वपुर्मे पातु कुब्जिका ॥ १७॥

ॐ श्रीं मूर्धादिपादान्तं वपुर्मे, पातु शारदा ।
ॐ ह्रीं सप्ताक्षरीपातु शारिका सकलं वपुः ॥ १८॥

पूर्वे मां पातु ब्रह्माणी वह्नौ मे वैष्णवी सदा ।
दक्षिणेऽवतु मां चण्डी नैर्ऋते मेऽपराजिता ॥ १९॥

पश्चिमेऽवतु कौमारी वायव्ये शाम्भवी च माम् ।
वाराही चोत्तरे पायादीशाने नारसिंहिका ॥ २०॥

प्रभाते मामुमा पातु मध्ये कामाऽवताच्च माम् ।
चार्वङ्गी मां दिनान्तेऽव्यान्निशादौ टङ्कधारिणी ॥ २१॥

निशीथेऽव्यादुग्रतारा निशान्ते पार्वती च माम् ।
सर्वत्र यक्षिणी पातु शिवा मां पातु सर्वदा ॥ २२॥

असिताङ्गः क्षितेः पातु रुरुर्मां पातु पाथसः ।
चण्डो मां पातु मरुतः क्रोधोऽव्यान्मां हुताशनात् ॥ २३॥

उन्मत्तः सोमतः पातु कपाली सूर्यतोऽवतु ।
भीषणो यज्ञविघ्नात्तु संहारः शून्यमण्डलात् ॥ २४॥

रणे मां कालिका पातु द्यूते त्रिपुरसुन्दरी ।
दुर्गाऽवतु विवादे वा श्रीचक्रं सर्वदाऽवतु ॥ २५॥

सर्वत्र सर्वदा देवी पातु मां शारिका परा ।
धनं पुत्रं सुतान्दारान्गृहं यद्यत्तु मामकम् ।
तत्तन्मम शिवः पातु वामदेवो चिदीश्वरः ॥ २६ ॥

इत्येतत्कवचं दिव्यं त्रिषु लोकेषु दुर्लभम् ।
त्रैलोक्यमोहनं नाम शारिकाया रहस्यकम् ॥ २७॥

विनाऽमुना न सिद्धिः स्यात्कवचेन्द्रेण पार्वति ।
कोटिलक्ष्यप्रजप्तस्य मन्त्रस्याऽस्य महेश्वरि ॥ २८॥

तस्मात्पठेच्छिवे वर्म मनुगर्भमनुक्षणम् ।
सर्वोत्पातप्रशमनं बलबुद्धिप्रवर्धनम् ॥ २९॥

परमानन्ददं लोके परमैश्वर्यकारणम् ।
यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि ॥ ३०॥

स एव भैरवाध्यक्षस्त्रैलोक्यविजयी विभुः ।
रवौ भूर्जे लिखेद्वर्म स्वयम्भूकुसुमस्रजा ॥ ३१॥

कुसुमेनाष्टगन्धेन स्तन्येन निजरेतसा ।
धारयेन्मूर्ध्नि वा बाहौ प्राप्नुयात्परमां गतिम् ॥ ३२॥

धनकामी लभेद्वित्तं पुत्रकामी लभेत्प्रजाम् ।
रणे रिपून्नरो हत्वा कल्याणी गृहमाविशेत् ॥ ३३॥

धृत्वा वक्षसि देवेशि वाग्मित्वं जायते क्षणात् ।
वन्ध्या च काकवन्ध्या च मृतवत्सा लभेत्सुतान् ॥ ३४॥

मार्काण्डेयायुषो देवि साक्षाद्वैश्रवणोपमान् ।
किं किं न लभते मर्त्यः पठन्कवचमुत्तमम् ॥ ३५॥

यः पठेदर्धरात्रे तु श्मशाने मुक्तकुन्तलः ।
पीत्वा शीधुं स देवेशि देवीदर्शनमाप्नुयात् ॥ ३६॥

स्तम्भयेद्भास्करं वायुं मोहयेत्त्रिजगद्ध्रुवम् ।

बहु किं कथ्यतां तस्य कवचस्याऽस्य धारणात् ॥ ३७॥

पठणाच्छ्रवणाद्वापि स भवेद्भैरवोपमः ।
इतीदं कवचं देवि त्रैलोक्यवश्यकारणम् ॥ ३८॥

त्रैलोक्यमोहनं नाम गोपनीयं सुरेश्वरि ।
यस्य कस्य न दातव्यं विना शिष्येण पार्वति ॥ ३९॥

दीक्षिताय कुलीनाय दत्त्वा मोक्षमवाप्नुयात् ।
विना दानं न गृह्णीयान्नदद्याद्दक्षिणां विना ॥ ४०॥

दत्त्वा गृहीत्वाऽप्युभयोः सिद्धिहानिर्भवेद्ध्रुवम् ।
अन्यथा यस्तु गृह्णीयाद्दद्याद्वा कवचेश्वरम् ॥ ४१॥

पुत्रान्दारान्सुताँश्चैव योगिन्यो भक्षयन्ति तम् ।
अज्ञात्वा कवचं देवि पूजयेच्छ्रीशिलां शिवे ॥ ४२॥

स भवेच्छिवहा सत्यं सर्वोपद्रवसङ्कुलः ।
धृत्वा यः कवचं देवि पूजयेच्छ्रीशिलां शिवे ॥ ४३॥

स एव परमां सिद्धिं लभते नात्र संशयः ।
इतीदं कवचं देवि सारं सर्वस्वमुत्तमम् ।
रहस्यं शारिकारत्नं गोपनीयं स्वयोनिवत् ॥ ४४॥

इति श्रीरुद्रियामले तन्त्रे शारिकाकवचं समाप्तम् ।

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, Psa Easwaran psaeaswaran

*Sharika Kavacham*
pdf was typeset on February 18, 2020

Please send corrections to *sanskrit@cheerful.com*